| | | |
|---|---|---|
| Emulation, Competition, assertion of superiority. | अहमहमिका[1] तु सा स्याद्यत्क्रियते स्पर्धयाधिकं[a] किञ्चित् । | |
| | यत्र वृथाभिनिवेशस्तामाहोपुरुषिकां[1] विदुः प्राज्ञाः ॥७८४॥ | Great self conceit or pride. |
| A war-cry 2. | सिंहनादो[1] भवेत् क्ष्वेडा[2] गण्डूषो[1] मुखपूरणम्[2] । | A handful of water for rinsing the mouth 2. |
| Power 3. | प्रभावतां[b][1] वदन्त्यार्याः प्रभुतां[2] प्रभविष्णुताम्[3] ॥७८५॥ | |
| Superiority 2. | परभागो[1] गुणोत्कर्षः[2] स्पर्धा[1] संहर्ष[2] उच्यते । | Rivalry 2. |
| Length 2. | आयामः[1] स्मृत आनाहः[2] परिणाहो[1] विशालता[2] ॥७८६॥ | Width, breadth 2. |

इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायां
सामान्यकाण्डं चतुर्थं समाप्तम् ॥ ४ ॥

a स्पर्द्धया किंचित्, स्पर्द्धयाधि किंचित् b प्रभावती ।